27.09.20
3

सारावलीकारेण पृथक् फलं प्रस्तुतं तत्रोक्तं —

वक्रिणस्तु महावीर्याः शुभाः राज्यप्रदा ग्रहाः।
पापा व्यसनिनां पुंसां कुर्वन्ति च वृथाऽटनम्॥

एवमत्र यदि शुभग्रहाः वक्रिणः भवन्ति तदा राज्यप्रदायकाः शुभकारकाश्च भवन्ति परन्तु यदि पापग्रहाः वक्रिणः तदा व्यसनपूर्वकं वृथाऽटनं पुंसां कुर्वन्ति।

सामान्यविश्रुतसिद्धान्तेन वक्रीग्रहः अशुभकारकः कथितः, मार्गीग्रहः शुभकारकः सुखकारकः च भवति, एवमेवाशयः गुरुपरम्परायां सन्दृश्यते काश्याम्। तत्र शुभकारकाः ग्रहाः यदि वक्रिणः भवन्ति, तदा अशुभाः, एवमेव अशुभाः वक्रिणः तदा शुभाः भवन्ति इति प्रयोगे प्राप्यते।

(ग) उदयास्तग्रहफलम् —

फलितशास्त्रोक्तः विधिः प्रायेण सिद्धान्तशास्त्रोपरि आधारितः वर्तते। यतो हि ग्रहाणां गणनासम्बन्धितकार्यं सिद्धान्तशास्त्रेण सम्पद्यते तत्रोक्तम् अस्तोदयादिविचारः —

समागमः शशाङ्केन सूर्येणास्तमना सह॥

अर्थात् यदा कोऽपि ग्रहः कालांशाभ्यन्तरे सूर्येण सह भवति तदा सूर्यप्रकाशप्रभावेण तस्य ग्रहस्य प्रकाशः रश्मिः वा प्रभावविहीनः भवति, अत एव सा स्थितिः अस्तसंज्ञया अभिधीयते। अस्तग्रहस्य प्रभावः क्षीणः खण्डितः वा भवति।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेन
पूर्णियाँ।

"उच्चस्थे दिननायके यदि धनी सेनापतिः शीतगौ" मन्दे ग्रामपुराट् वा क्षितिपतिर्जातः कुमारीरतः, राहौ पारेडनाधिपः।

एवमत्र राहु-शनि निर्बलौ सामान्यौ एव शुभकारकौ भवतः।

नीचस्थे सति ग्रहे तद्भावजनितविशेषफलस्य हानिः भवत्येव, केवलं राहुरेव नीचस्थः शुभकारकः, यतो शनिविषये मतैक्यं नावलोकयते ग्रन्थे।

(ख) वक्रीग्रह-मार्गितग्रहफलम् ——

जातकस्य जन्मकुण्डल्यां ग्रहाणां प्रभावः विविधदृष्ट्या विचार्यते। सूर्य-चन्द्रयोः विचारः त्यक्त्वा अन्येषां ग्रहाणां मार्गवक्ररूपगतिद्वय-मुत्पद्यते। तत्राद्या मार्गीगतिः सामान्या पूर्वाभिमुखी शास्त्रेषु निबद्धा परन्तु अपरा वक्रगतिः स्वभावतो भिन्नदिग्गता अर्थात् पश्चिमभिमुखगता भवति, यस्यानयनं द्वितीयशीघ्रकेन्द्रांशवशेन क्रियते सिद्धान्त ग्रन्थे। फलितशास्त्रे एतयोः गत्योः प्रभावः प्रत्यक्षदृष्ट्या जनोपरि दृश्यते। विषयेऽस्मिन् जातक-तत्त्वे प्राप्यते यत् ——

वक्रो उच्चगो वा महाबली॥

अर्थात् वक्रगतिकः उच्चस्थः ग्रहः वा पूर्णबल-वान् भवति। प्रसङ्गेऽस्मिन् मन्त्रेश्वरेण फलदीपिकायां लिखितं ——

वक्रं गतः स्वोच्चफलं विदध्यात्सपत्ननीचर्क्षगतोऽपि खेट।
वर्गोत्तमांशास्थितखेचरोऽपि स्वक्षेत्रगस्योक्तफलानि तद्वद्॥

अर्थात् वक्रीग्रहः स्वोच्चग्रहमिव फलं ददाति, स ग्रहः नीचस्थः, शत्रुगृहगतः वा कथं न स्यात् परन्तु स शुभकारकः एव भवति।

नीचास्तादिवक्रोच्चगतग्रहफलविचारः—

ज्योतिषशास्त्रे उच्च-नीच-वक्र-मार्गी-अस्तोदय-प्रभृतिस्थितीनां फलानि भिन्न-भिन्न-आचार्यैर्दृष्ट्या सान्तराणि उक्तानि सन्ति। तत्र उच्चगतग्रहे सति प्रायः सर्वैरपि आचार्यैः शुभकारकः एव चिह्नः फलं वा लिखितमस्ति परन्तु कुत्रचिद् विरोधः सन्दृश्यते। कुत्रचित्तु सामान्यसिद्धान्ताद् भिन्नसम्बन्धः प्रतिपादितः वर्तते। एवमेव नीचास्तादिविषये मतान्तरं प्राप्यते। अत्रैव विविच्यन्ते तादृशाः पक्षाः विषयाश्च स्थलेऽस्मिन्।

(क) उच्चस्थफलम् — प्रायः सर्वेष्वपि ग्रन्थेषु स्थलेषु वा उच्चस्थग्रहफलं तद्भावस्य कृते शुभकारकः गृहीतमस्ति। परिणामस्वरूपं पञ्चमहापुरुषयोगनिर्माणे उच्चस्थानं महत्त्वपूर्णमिति मत्वाऽऽचार्यैः योगोऽयं वर्णितः। तत्र सर्वेष्वपि ग्रहेषु एकः नियमः समुचितः प्रदर्शितः परन्तु शनिविषये किञ्चिद् भिन्नमिति शास्त्रदृष्ट्या इति केचन वदन्ति। यतो हि आत्मादिकारकप्रसङ्गे प्रोक्तमस्ति यत् 'शनिः कालनरस्य दुःखम्' पुनः 'विपरीतं शनेः स्मृतम्' इति पंक्त्या दुःखबलवान् अत्यधिकः कष्टकारकः भवति। एवमत्र निर्बलः एव शनिः उचितः सुखार्थे मन्यते। एवमत्र शनिः यदि उच्चराशौ गच्छति तदा नेष्टः इति विपरीतफलं प्राप्यते। एवमेव भावदृष्ट्या विचार्यते तर्हि निष्पद्यते यत् — यदि षष्ठेशः, अष्टमेशः, द्वादशेशः वा उच्चस्थे स्यात्तदा जातकः शुभफलम् अप्राप्य अशुभफलमेव प्राप्नोति। यतो हि यदि षष्ठेशः षष्ठे, स्वराशौ; अष्टमेशः अष्टमे, स्वराशौ; द्वादशेशः द्वादशे, स्वराशौ वा भवन्ति तदा जातकः शरीरसुखं न प्राप्नोति। एवमेव उच्चभूते सति एते ग्रहाधीशाः अपि अशुभकारकाः एव भवन्ति। यथा जातकपरिजाते उच्चग्रहाणां फलादेशः वर्णितः वर्तते—

P.T.O